Critical Survey of Sanskrit Drama
3rd Sem
CC 5, Sec-D

# टीका

• **भवभूतिः**

कालिदासोत्तरसंस्कृतसाहित्ये अन्यतमः श्रेष्ठः नाट्यकारः भवभूतिः। सः वैदिकः काश्यपः वंशीयः, तस्य पिता नीलकण्ठदेवः माता च जातुकर्णी अस्ताम्। भट्टगोपालः तस्य पितामहः प्रख्यातः महाकविरासीत्, भारतवर्षस्य दक्षिणपथे विदर्भ इति स्थाने तस्य पितृपुरुषस्य वासभूमिरासीत्। भवभूतिः वेद-वेदान्त-सांख्य-योग-छन्द-ज्योतिषम् इत्यादिषु विषयेषु सुपण्डितरासीत्। मालतीमाधवस्य पुष्पिकायां वर्ण्यते यत् भवभूतिः कुमारिलः शिष्यः उदुम्बराचार्यः आसीत्। मालतीमाधवम्, महावीरचरितम्-उत्तररामचरितञ्च त्रीणि नाटकानि भवभूतेः श्रेष्ठ-साहित्य निदर्शनम्।

नाट्यकारः सप्ताङ्कविशिष्टम् महावीरचरितम् रामविवाहतः राज्याभिषेकं पर्यन्तम् काहिनीम् अवलम्ब्य रचितवान्। अस्य नाटकस्य नायकः अयोध्यायाः कुलतिलकः रामचन्द्रः। वीररसप्रधान-मिदं नाटकम्।

सप्ताङ्कविशिष्टम् रामचन्द्रस्य जीवनस्य उत्तरभागमवलम्ब्य उत्तररामचरितम् नाटकं रचितम्। नाट्यकारस्य भवभूतेः सर्वश्रेष्ठं नाटकमिदम् उत्तररामचरितम्।

दशाङ्कप्रकरणम् मालतीमाधवम्, मालतीमाधवयोः प्रणकाहिनी-मुपजीव्य रचितम्, प्रकरणमिदं शृङ्गाररसात्मकम्।

भाषाशैली-चरित्रचित्रणे च नाट्यकारस्य भवभूतेः विचक्षणता अद्वितीया अस्ति, सरलक्लिष्टः समाससंकुलः गाढबन्धः समासरहितः भाषाप्रयोगेऽपि अद्वितीय नाट्यकारः भवभूतिः, संस्कृतसाहित्ये श्रेष्ठेषु नाट्यकारेषु भवभूतिः स्वीयवैशिष्ट्ये समुज्ज्वलः।

---

• कालिदासः

विश्वसाहित्यस्य अपरविस्मयः महाकविः कालिदासः, भारतवर्षस्य इतिहासे स्वर्णयुगरूपेण समादृते गुप्तयुगे तथा ईशवीये चतुर्थं पञ्चमं वा शतके महाकवेः कालिदासस्य संस्थितिरासीत्, इति विद्वांसः मन्यन्ते। वाल्मीकि-व्यास-अश्वघोष भासैः संस्कृतसाहित्ये यः काव्यमार्गः रचितः कालिदासः तस्मिन् काव्यमार्गे राजाधिराजरूपेण विराजितः। कविशिरोमणिः कविकुलगुरुः कालिदासः कविश्रेष्ठः इति उच्यते। महाराजविक्रमादित्यस्य राजसभायां नवरत्नेषु अन्यतमरासीत् महाकविः कालिदासः।

कालिदासस्य सप्तसंख्यकानि काव्यानि वर्तन्ते— कुमारसम्भवम् रघुवंशम् चेति द्वे महाकाव्ये, ऋतुसंहारम्; मेघदूतम् चेति द्वे गीतिकाव्ये, मालविकाग्निमित्रम्, विक्रमोर्वशीयम्, अभिज्ञानशकुन्तलम् चेति त्रीणि नाटकानि। एताः कृतयः संस्कृतसाहित्यस्य अमूल्यनिधि-रूपेण वर्तन्ते। एतेषु नाटकेषु अभिज्ञानशकुन्तलम् इति नाटकं हि सर्वश्रेष्ठम्। तदुक्तम् — 'कालिदासस्य सर्वस्वमभिज्ञानशकुन्तलम्' इति।

कालिदासस्य काव्येषु अनन्यसुलभगुणवती कापि रमणी रमते तदीयभारती। उपमाप्रयोगे कवेः पटुत्वम् अवलोक्य पण्डिताः कथयन्ति — "उपमा कालिदासस्य" इति। मनोरमायाः उपमायाः उदाहरणं यथा

"अधरः किशलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम्"॥ इति

न केवलम् उपमाप्रयोगे, अलङ्कारान्तरप्रयोगे, रसविन्यासे, कल्पनाचातुर्ये, छन्दः झङ्कारे, ललितपदविन्यासे, चरित्रचित्रणे च कवेः दक्षता सर्वत्र प्रथ्यते। अपि च कालिदासस्य काव्येषु अनेकाः सूक्तयः अस्माकं व्यवहारिकजीवने उपकारं साधयन्ति।